हिन्दी भाषा। तत्पर्य्यायः। दारदातुः २ वरदातुः ३ खरच्छदः ४। अस्य गुणाः। शिशिरत्वम्। रक्तपित्तप्रसादनत्वञ्च। इति भावप्रकाशः॥

भूम्यामलकी, स्त्री, (भूमिलग्ना आमलकी शाकपार्थिवादित्वात् समासः) क्षुपविशेषः। भूँइ आमला इति भाषा। तत्पर्य्यायः। बहुपुष्पी २ अझटा ३ अध्यण्डा ४ तालिः ५ तामलकी ६ अमटा ७ सूक्ष्मफला ८ शिवामलकी ९। इति रत्नमाला। वितुन्नकः १० झटा ११ अमला १२ अजझटा १३ ताली १४ शिवा १५। इत्यमरः। २।४।१२७॥ झाटा १६ मंला १७ झाटामला १८ अमलाजझटा १९। इत्यमरटीकायां भरतः॥ भूम्यामलकिका २० शिवामलकी २१ बहुपत्रा २२ बहुफला २३ बहुवीर्य्या २४ भूधात्री २५। अस्या गुणाः। वातकारित्वम्। तिक्तत्वम्। कषायत्वम्। मधुरत्वम्। हिमत्वम्। पिपासाकासपित्तासृक्कफपाण्डुक्षतनाशित्वञ्च। इति भावप्रकाशः॥

भूम्यामली, स्त्री, (भूम्यां आमलते आत्मानं धारयतीति। आ + मल + अच्।) भूम्यामलकी। भुइनेली इति हिन्दी भाषा। भूँइ आमला इति वङ्गभाषा। तत्पर्य्यायः। तमाली २ ताली ३ तमालिका ४ उच्चटा ५ हड़पादी ६ वितुन्ना ७ वितुन्निका ८ भूधात्री ९ चारटी १० दृश्यां ११ विषघ्नी १२ बहुपत्रिका १३ बहुवीर्य्या १४ अहिभयदा १५ विश्वपर्णी १६ हिमालया १७ अजझटा १८ वीरा १९। अस्या गुणाः। कषायत्वम्। अम्लत्वम्। पित्तमेहदाहनाशित्वम्। शिशिरत्वम्। मूत्ररोधार्त्तिशमनत्वञ्च। इति राजनिर्घण्टः।

भूम्याहुल्यं, क्ली, (भूमिमाहुलति आच्छादयतीति। आ + हुल + कः। ततः यत्।) क्षुपविशेषः। भूमितखड् इति हिन्दी भाषा। तत्पर्य्यायः। कुष्ठकेतु २ मार्कण्डीयम् ३ महौषधम् ४। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। ज्वरकुष्ठामविध्वनाशित्वञ्च। इति राजनिर्घण्टः॥

भूयः, [स्] व्य, (भुवे भावाय यस्यति यतते इति। भू + यस् + क्विप्।) पुनरर्थम्। इति शब्दरत्नावली॥ (यथा, विष्णुपुराणे।१।४।२४।
"यन्नोक्तं यच्च नैवोक्तं मयात्र परमेश्वर!।
तत् सर्व्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः॥"

भूयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुरिति बहु + "द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्। "बहोर्लोपोभू च बहोः।" ६।४।१५८। इतीयसुन इ लोपः भूरादेशश्च।) बहुतरः। इति मेदिनी। से, १०॥ (यथा, मनुसंहितायाम्।२।१३७।
"पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च।"

भूयिष्ठं, त्रि, (अयमेषामतिशयेन बहुरिति। बहु + इष्ठन्। "इष्ठस्य यिट् च।" ६।४।१५९। इति यिड़ागमो बहोः स्थाने भूरादेशश्च।) प्रचुरः। इत्यमरः।३।१।६३॥ (यथा, ऋग्वेदे। ८।८५।३।
"इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वोर्भूयिष्ठमोजः॥")

भूयुक्ता, स्त्री, (भुवा + युक्ता।) भूमिखर्ज्जुरी। इति राजनिर्घण्टः॥

भूरि, क्ली, (भवति भूयते वेति। भू + "अदिशदिभूशुभिभ्यः क्रिन्।" उणा०।४।६५। इति क्रिन्।) स्वर्णम्। इत्यमरः।३।१।६३॥

भूरिः, पुं, (भवतीति। भू + "अदिशदिभूशुभिभ्यः।" उणा० ४।६५। इति क्रिन्।) विष्णुः। ब्रह्मा। शिवः। इति मेदिनी। रे, ७३॥ वासवः। इति शब्दरत्नावली॥ (सोमदत्तस्य पुत्रभेदः। यथा, महाभारते।१।१८७।१४।
"कौरवः सोमदत्तश्च पुत्राश्चास्य महारथाः।
समवेतास्त्रयः शूरा भूरिर्भूरिश्रवाः शलः॥")
प्रचुरे, त्रि। इत्यमरः।३।१।६३॥ (यथा, ऋग्वेदे।७।४।२।
"संयोवनायुवते शुचिदन्भूरि
चिदन्नासमिदत्ति सद्यः॥")

भूरिक्, [ज्] स्त्री, (भरति सर्व्वं धरतीति भृञ्। भृञ उच्च।" उणा० २।७२। इति इजिः स च कित् धातोरुकारान्तादेशश्च। पृषोदरादित्वात् साधुः।) पृथिवी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

भूरिगन्धा, स्त्री, (भूरिः प्रचुरो गन्धोऽस्याः। ततष्टाप्।) मुरानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (मल्लाट्यायाश्च, त्रि॥)

भूरिगमः, पुं, (भूरिभिर्भारैर्गच्छतीति। भूरि + गम + "ग्रहवृदृनिश्चिगमश्च।" ३।३।५८। इति अप्।) गर्द्दभः। इति राजनिर्घण्टः॥

भूरिदावा, [न्] पुं, भूरि ददाति यः। (भूरि + दा + वनिप्। प्रचुरदाता। इति मुग्धबोधव्याकरणम्॥ (यथा, ऋग्वेदे।२।२७।१७।
"माहं मघोनो वरुणप्रियस्य भूरिदाव्न
आविदं शूनमापेः॥")

भूरिदुग्धा, स्त्री, (भूरीणि दुग्धानि निर्यासा यस्याः।) वृश्चिकाली। इति राजनिर्घण्टः॥ (गुणादयोऽस्या वृश्चिकालीशब्दे ज्ञातव्याः॥)

भूरिपत्रः, पुं, (भूरीणि पत्राण्यस्य।) उखलतृणम्। इति राजनिर्घण्टः॥

भूरिपलितदा, स्त्री, (भूरि पलितं केशपाकं दायति शोधयति इति दैप् + कः। टाप्।) पाण्डुरफली। इति राजनिर्घण्टः॥

भूरिपुष्पा, स्त्री, (भूरीणि पुष्पाण्यस्याः।) शतपुष्पा। इति राजनिर्घण्टः॥

भूरिप्रेमा, [न्] पुं, (भूरिः प्रेमा प्रेयसी यस्य।) चक्रवाकः। इति राजनिर्घण्टः॥

भूरिफेना, स्त्री, (भूरयः फेना यस्याः।) सप्तलाह्वयः। इत्यमरः।२।४।१४३॥ चामारकषा इति भाषा॥

भूरिबला, स्त्री, (भूरि बलं यस्याः।) अतिबला। इति राजनिर्घण्टः॥

भूरिमल्ली, स्त्री, (भूरि मल्लते इति। मल्ल + अच् ङीष्।) अम्बष्ठा। इति राजनिर्घण्टः॥

भूरिमायः, पुं, स्त्री, (भूरी माया यस्य।) शृगालः। इत्यमरः।२।५।५॥

भूरिशः, [स्] व्य, बहुशः। बह्वर्थात् कारकस् वेति कारकभूरिशब्दात् चशसुप्रत्ययनिष्पन्नोऽयं शब्दः। इति मुग्धबोधव्याकरणम्॥ (भूरीणि भूरीणि इति वीप्सायां शस्। (यथा, महानिर्व्वाणतन्त्रे।१।५२।
"बहुपद्यासनादीनि गदितान्यपि भूरिशः॥")

भूरिश्रवाः, [स्] पुं, (भूरि श्रवो यज्ञादिजनितं यशो यस्य सः।) चन्द्रवंशीयसोमदत्तराजपुत्रः। यथा, महाभारते।१।१८७।१४।
"समवेतास्त्रयः शूराः भूरिर्भूरिश्रवाः शलः॥")
स तु अर्ज्जुनसात्यकिभ्यां हतः। इति महाभारतम्॥ (बहुयशोविशिष्टे, त्रि॥)

भूरुण्डी, स्त्री,(भुवं पृथिवीं रुणद्धि भुवि रोहतीति वा। भू + "रुध + वा रुह + कः पृषोदरादित्वात् मकार डकारौ गौरादित्वात् ङीष्।) श्रीहस्तिनी क्षुपः। इत्यमरः।२।४।५९॥ (भूरुण्डीति च सर्व्वानन्दः।) हातिशुँड़ा इति भाषा॥

भूरुहः, पुं, (भुवि रोहति प्रादुर्भवतीति भू + रुह + कः।) वृक्षः। इति शब्दमाला॥ (यथा, माघे।७।५०।
"इदमिदमिति भूरुहाम्प्रसूनैः।")

भूर्जः, पुं, (ऊर्ज्ज + घञ्। भूः ऊर्ज्जो बलं यस्य। भुवि ऊर्ज्जयते इति भू + ऊर्ज्ज + अच् वा।) स्वनामख्यातवृक्षविशेषः। भोजपत्र इति हिन्दीभाषा। (यथा, रघौ।४।७३।
"भूर्ज्जेषु मर्म्मरीभूताः कीचकध्वनिहेतवः।")
तत्पर्य्यायः। वल्कद्रुमः २ भुर्जः ३ मृदुचर्म्मा ४ भूर्जपत्रकः ५ चित्रत्वक् ६ बिन्दुपत्रः ७ रक्षापत्रः ८ विचित्रकः ९ भूतघ्नः १० मृदुपत्रः ११ शैलेन्द्रस्थः १२। इति राजनिर्घण्टः॥ भूर्जपत्रः १३ चर्म्मी १४ बहुलवल्कलः १५। इति भावप्रकाशः॥ छत्रपत्रः १६ शिवः १७ स्थिरच्छदः १८। इति रत्नमाला॥ मृदुत्वक् १९। इत्यमरः।२।४।४६। पत्रपुष्पकः २०। इति भरतधृतमधुः॥ भुजः २१ बहुपटः २२ बहुत्वक्कः २३ मृदुत्वचः २४। इति भरतधृतस्वामी॥ अस्य गुणाः। बलकारित्वम्। कफरक्तनाशित्वञ्च। इति राजवल्लभः॥ कटुत्वम्। कषायत्वम्। उष्णत्वम्। भूतरक्षाकरत्वम्। त्रिदोषशमनत्वम्। पथ्यत्वम्। दुष्टकौटिल्यनाशित्वञ्च। इति राजनिर्घण्टः॥ कर्णरोगपित्तरक्षसमेदविषहरत्वञ्च। इति भावप्रकाशः॥ (यथा, वाभटे शारीरस्थाने प्रथमेऽध्याये॥
"भूर्ज्जलाङ्गलिकीतुम्बीसर्पत्वक्कुष्ठसर्षपैः।
पृथक् द्वाभ्यां समस्तैर्वा योनिलेपनधूपनम्॥")